## किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्। (४४/३९६१)

किम् इत्येतत् क्रियाप्रश्ने यदा वर्तते [1]तदानेन युक्तं तिङन्तं [2]अनुपसर्गम् अप्रतिषिद्धं नानुदात्तं भवति। किं देवदत्तः पचति, आहोस्विद् भुङ्क्ते। किं[3] देवदत्तः शेते, आहोस्विद् अधीते। अत्र केचिदाहुः, पूर्वं कियुक्तम् इति तन्न निहन्यते, उत्तरं तु न कियुक्तम् इति तन्निहन्यत एव इति। अपरे [4]त्वाहुः, यद्यप्येकस्य आख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योगः इति उभयत्र प्रतिषेधेन भवितव्यम् इति। क्रियाग्रहणं किम्? साधनप्रश्ने मा भूत्, किं देवदत्तः ओदनं पचति, आहोस्विच्छाकम् इति। प्रश्न इति किम्? किम् अधीते देवदत्तः। क्षेपे किंशब्दोऽयम्, न प्रश्ने। अनुपसर्गम् इति किम्? किं देवदत्तः प्रपचति, आहोस्वित् प्रकरोति। अप्रतिषिद्धम् इति किम्? किं देवदत्तो न [5]पठति, आहोस्विन्न करोति॥

## लोपे विभाषा। (४५/३९६२)

किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गम् अप्रतिषिद्धं विभाषा नानुदात्तं भवति। क्व चास्य लोपः? यत्र गम्यते चार्थः, न च प्रयुज्यते किंशब्दः। देवदत्तः पचति, आहोस्वित् पठति। विनैव किमा प्रश्नोऽवगम्यते। प्राप्तविभाषेयम् किमर्थेन योगात्। पूर्ववत् प्रत्युदाहरणानि॥

## एहि मन्ये प्रहासे लृट्। (४६/३९६३)

एहि मन्ये इत्यनेन युक्तं [6]लृडन्तं नानुदात्तं भवति प्रहासे। [7]प्रकृष्टो हासः प्रहासः, क्रीडा। [8]एहि मन्ये ओदनं भोक्ष्यसे, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन ते पिता। प्रहासे इति किम्? एहि मन्यसे ओदनं भोक्ष्ये इति। सुष्ठु मन्यसे। साधु मन्यसे। गत्यर्थलोटा लृट् (८.१.५१/३९५८) इत्येव सिद्धे सत्यारम्भो [9]नियमार्थः, एहिमन्येयुक्ते प्रहासे एव यथा स्यात्, अन्यत्र मा भूत् इति, एहि मन्यसे ओदनं भोक्ष्ये इति। एहि मन्ये इत्युत्तमोपादानमतन्त्रम्। प्रहासे एव हि मन्यतेरुत्तमो विहितः, ततोऽन्यत्र मध्यम एव भवति। तत्रानेन नियमेन निवृत्तिः क्रियते, एहि मन्यसे ओदनं भोक्ष्ये इति॥

## जात्वपूर्वम्। (४७/३९६४)

जातु इत्येतदविद्यमान[10]पूर्वम्, तेन युक्तं तिङन्तं[11] नानुदात्तं भवति। जातु भोक्ष्यसे। जातु [12]करिष्यामि। अपूर्वम् इति किम्? कटं जातु करिष्यति॥

---

1. तेन क.ड.इ. 2. अनुपसर्गप्रतिषिद्धं क. 3. यज्ञदत्तो यजति क, कं देवदत्तो यजति ड. 4. पुनराहुः ब. 5. पचति क. ड. इ. 6. तिङन्तं क. इ. 7. प्रकृष्टो हासः नास्ति इ. 8. प्रहासे इत्यधिकम् इ. 9. नियमाय ह. 10. °पूर्वे नियमप्रतिषेधवारणं इ, °पूर्वे निघातप्रतिषेधवारणं क. 11. लृडन्तं इत्यधिकम् इ. तत् इत्यधिकम् क. 12. करिष्यसि ब. इ.